तान्ते निर्वाणमृच्छति। आकाशात्तारकं लिङ्गं ज्योतीरूपमिहागतम्। ज्ञानवाप्याः पुरोभागे तल्लिङ्गं तारकेश्वरम्। तारकज्ञानमभ्येति तल्लिङ्गस्य समर्चनात्। ज्ञानवाप्यां नरः स्नात्वा तारकेशं विलोक्य च। कृतसन्ध्यादिनियमः परितर्प्य पितामहान्। धृतमौनव्रतो धीमान् यावल्लिङ्गविलोकनम्। मुच्यते सर्वपापेभ्यः पुण्यं प्राप्नोति शाश्वतम्। प्रान्ते च तारकं ज्ञानं यस्मात् ज्ञानाद्विमुच्यते। किरातान्च किरातेश इह चाविर्बभूव ह। किरातरूपो भगवान् यत्र देवोऽभवत् पुरा। तत्किरातेश्वरं लिङ्गं भारभूतेश्वरादनु। नमस्कृत्वा नरो जातु न मातुरुदरेशयः। लङ्कापूर्य्याः समागच्छन्मरुकेश्वरसंज्ञकम्। पौलस्त्यलाघवात् पश्चात् पूजितं सर्वदुःखहृत्। पुण्यं जलप्रियं लिङ्गं जललिङ्गस्थलादपि। आयातं तच्च गङ्गाया जलमध्ये व्यवस्थितम्। तत्प्रासादोऽङ्गुततरो मध्येगङ्गं निरीक्ष्यते। सर्वधातुमयः श्रेष्ठः सर्वरत्नमयः शुभः। अद्यापि दृश्यते कैश्चित् पुण्यसम्भारगौरवात्। श्रेष्ठं लिङ्गमिहायातं तीर्थात्कोटीश्वरादपि। कोटिलिङ्गक्षणपुण्यं तल्लिङ्गस्य निरीक्षणात्। श्रेष्ठं श्रेष्ठेश्वरात्मस्मात् श्रेष्ठसिद्धिप्रदायकम्। वड़वास्यात् समुद्भूतं लिङ्गमात्रानलेश्वरम्। नलेश्वरपुरोभागे पूजितं सर्वसिद्धिदम्। आगत्य विरजस्तीर्थाद्देवदेवस्त्रिलोचनः। लिङ्गे त्वनादिसंसिद्धे ह्यवतस्थे त्रिपिष्टपे। पुण्ये पिलिप्पिले तीर्थे सर्वेषां तारकप्रदे। आविरासीत् स्वयं देव ओङ्कारेऽमरकण्टकात्। तदाद्यं तारकक्षेत्रं यदा गङ्गा न चागता। तदैवाविरभूत् काशी त्रैलोक्योद्धरणाय वै। तदोङ्कृतिमहल्लिङ्गं स्वयमाविरभूत्ततः। महिमानं न तस्यान्यः परिवेत्ति विभो! कृते। एतान्यायतनानीश! आनिनाय महान्ति च। शेषयित्वांशमात्रञ्च तस्मिन् क्षेत्रे निजे निजे। इहायातानि पुण्यानि सर्वभावेन नान्यथा। प्रासादाः सर्वतः श्रेष्ठा रम्या अभ्रंलिहा विभो!। बहुधातुमयाश्चित्राः सर्वरत्नमहोज्ज्वलाः। येषां कलसमात्रस्य दर्शनान्मुक्तिराप्यते। श्रुत्वा च नामचैतेषां लिङ्गानां सुरसत्तम! अपि जन्मसहस्रोत्थाः क्षीयन्ते पापराशयः। इदानीं को निदेशोऽत्र मयानुष्ठेय ईशितः!। प्रसादीक्रियतां सोऽपि सिद्धो मन्तव्य एव हि। श्रीस्कन्द उवाच। श्रुत्वेति नन्दिनो वाक्यं देवदेवेश्वरो हरः। मुदा प्रसाद्य शैलादिमिदं प्रोवाच कुम्भज!। श्रीदेवदेव उवाच। साधु कृतं त्वया नन्दिन्! सदानन्दविधायक!। विधेहि मे निदेशं च चण्डीव्यापारयाधुना। नव कोट्यस्तु चामुण्डायास्तत्र निवसन्ति हि। सदैव ताभिः सहिताः भूतवेतालभैरवैः। ताः पुरीरक्षणार्थाय सवाहनबलायुधाः। प्रतिदुर्गं दुर्गरूपाः परितः परिवासय। श्रीस्कन्द उवाच। नन्दिनं स निदेश्यापि मृडान्या सहितो मृडः। ययौ त्रैपिष्टपं क्षेत्रं मुक्तिबीजप्ररोहणम्। शिलादतनयोऽप्येशीं मूर्द्धन्याज्ञां विधाय च। आहूय सर्वास्ता दुर्गाः प्रतिदुर्गं न्यवेशयत्। निशम्याध्यायमेतच्च पुण्यायतनगर्भितम्। नरः स्वर्गापवर्गौ च प्राप्नुयात् श्रद्धया क्रमात्। श्रुत्वाष्टषष्टिमेतां वै महायतनसंभवाम्। न जातु प्रविशेन्मर्त्यो जनन्या जठरीदरीम्"। [प्रशंसनीयत्वात्। केशे हेमच०।

**तीर्थवाक** पु० तीर्थस्येव वाको वचनमस्य उत्ताङ्गस्थित्या

**तीर्थशौच** न० तीर्थस्य घट्टस्य शौचं परिष्कारः। घट्टादिपरिष्कारे। "सेतुबन्धरता ये च तीर्थशौचरताश्च ये। तड़ागकूपकर्त्तारो मुच्यन्ते ते तृषाभयात्"। आदित्यपु० तीर्थशौचं घट्टपरिष्कारः" रघु०।

**तीर्थसेनि** स्त्री कुमारानुचरमातृभेदे। "माधवी शुभवक्त्रा च तीर्थसेनिश्च भारत!" भा० शल्य० ४७ अ०।

**तीर्थसेविन्** पुंस्त्री० तीर्थं जलप्रान्तं सेवते मत्स्याहारार्थं सेव–णिनि। १बके राजनि०स्त्रियां ङीप्। २तीर्थसेवके त्रि०।

**तीर्थ्य** पु० तीर्थे भवः यत्। रुद्रभेदे। "नमस्तीर्थ्याय च कुल्याय च" यजु० १६।४२। समानतीर्थे वसति यत्। सतीर्थ्य एकगुरुके अमरः। [तितीव।

**तीव** स्थौल्ये भ्वा० पर० अक० सेट्। तीवति अतीवीत्।

**तीवर** पु० तृ–ष्वरजन्तः नि०।१समुद्रे, २व्याधे, ३वर्णसङ्करजातिभेदे(तेओर)पुंस्त्री० जातिशब्दे दृश्यम्। स्त्रियां ङीष्।

**तीव्र** न० तीव–रक् तिज–वन् दीर्घः जस्य वो वा। १अतिशये २तद्वति त्रि० अमरः। ३तीक्ष्णे ४लौहभेदे (इस्पात) ५तीरे ६त्रपुणि च उणा० ७लौहमात्रे राजनि०। ८अत्युष्णे ९कटौ १०नितान्ते च त्रि० उणा०। ११शिवे पु०शब्दर०। "विलङ्घिताधोरणतीव्रयत्नाः" रघुः। "तीव्रोत्थितास्तावदसह्यरंहसः" "तीव्रं महाव्रतमिवात्र चरन्ति वप्राः" माघः। वैराग्यस्य उपायस्य च तीव्रत्वं पात० सू० भाष्ये विवरणे च दर्शितं यथा "ते खलु नव योगिनो मृदुमध्याधिमात्रोपाया भवन्ति। तद्यथा, मृदूपायोमध्योपायोऽधिमात्रोपाय इति। तत्र मृदूपायोऽपि त्रिविधः मृदुसंवेगोमध्यसंवेगस्तीव्रसंवेग